दिनाङ्क :-23.10.2025

प्रात: - 06:55

## राष्ट्रपतिः केरल

केरलराज्यस्य चतुर्दिवसीय यात्रायां राष्ट्रपतिः द्रौपदी मुर्मुः, अद्य केरलस्य राजभवने पूर्वराष्ट्रपतेः के. आर्. नारायणन् वर्यस्य प्रतिमायाः अनावरणं करिष्यति। तदनन्तरं राष्ट्रपतिः तिरुअनन्तपुरम्-नगरस्य समीपे वर्कला-नगरस्य शिवगिरि-मठे श्रीनारायण-गुरु-समाधेः शतवार्षिकोत्सवे भागं ग्रहीष्यति। अपराह्ने राष्ट्रपतिः पाला-नगरस्य सेण्ट्-थोमस्-महाविद्यालयस्य प्लैटिनम्-ज्यूबलीति समारोहे मुख्यातिथिः भविष्यति। ह्यः राष्ट्रपतिः दर्शनाय सबरीमाला-पर्वतीय तीर्थं गतवती, अनन्तरं तिरुवनंतपुरं-नगरे केरलस्य राज्यपालेन आयोजिते रात्रिभोज कार्यक्रमेपि भागं भजितवती।

## पियूष-गोयलः

वाणिज्योद्योग-मन्त्री पियूष-गोयलः आर्थिक-व्यापार-सहभागितां सुदृढीकरणाय अद्यारभ्य जर्मनी-देशस्य आधिकारिकयात्रायां भविष्यति। पञ्चविंशत्यधिक द्वि सहस्रतमे वर्षे भारत-जर्मनी-सामरिकसहभागित्वस्य पञ्चविंशतितमं वार्षिकोत्सवः अस्ति अतः जर्मनी-देशेन सह भारतस्य सम्पर्कं वर्धयितुं इयं यात्रा महत्त्वपूर्णं सोपानं भविष्यति। भ्रमणकाले श्रीगोयलः जर्मनीदेशस्य आर्थिककार्य-ऊर्जामन्त्रिणा कैथरीना रीचे इत्यनया सह उच्चस्तरीयं द्वैपाक्षिकं मेलनं करिष्यति।

## निर्वाचन-आयोग

निर्वाचन-आयोगेन पश्चिमवङ्गप्रदेशे एकसहस्रतोप्यधिकेभ्यः बी.एल.ओ. इति बूथ्-स्तरीय-अधिकारिभ्यः आयोगस्य निर्देशानां नानुपालनाय सञ्चेतना प्रदत्तास्ति। आयोगस्य सूत्रानुसारं, अस्मिन् वर्षे अप्रेल्-मासे राज्ये बी. एल्. ओ. इत्येतेषां नियुक्ति-प्रक्रिया आरब्धा, परञ्च अक्टूबर-मासस्य सप्तदश दिनाङ्कपर्यन्तं सहस्रतोप्यधिकाः बी. एल्. ओ. अधिकारिणः कार्यभारं न स्वीकृतवन्तः। अतः तेभ्यः आयोगेन निर्देशानाम् उल्लङ्घनाय सञ्चेतना प्रदत्ता अस्ति।

## बिहार-विधानसभा-निर्वाचन

अद्य बिहार-विधानसभा-निर्वाचनस्य द्वितीयान्तिमस्य च चरणाय नामाङ्कनपत्राणां प्रत्यावर्तनस्य अन्तिमः दिवसः अस्ति। नवम्बर्-मासस्य एकादश दिनाङ्के विंशति मण्डलेषु प्रसृतेषु द्वाविंशत्यधिकैकशत विधानसभाक्षेत्रेषु मतदानं भविष्यति।

अस्मिन्नेवक्रमे कैमूर्-मण्डलस्य मोहनियायाः आरक्षित निर्वाचनक्षेत्रे (आर्. जे. डी.) इति राष्ट्रिय-जनता-दलस्य प्रत्याशिनः श्वेता-सुमन् इत्यस्याः नामाङ्कनं ह्यः निरस्तम् अभवत्। पश्चिमी-चम्पारण्-मण्डलस्य वाल्मीकिनगर-विधानसभाक्षेत्रे जन-सुराज-दलस्य प्रत्याशिनः दृग-नारायण-प्रसादस्य नामाङ्कनं अपि निरस्तम् अभवत्। द्वितीये चरणे एतयोः निर्वाचनक्षेत्रेषु मतदानं भविष्यति।

## ऋतुविभाग

भारतऋतुविभागेन अद्य आन्ध्रप्रदेशे, उत्तर-तमिलनाडु-राज्ये, दक्षिणान्तरिक-कर्नाटके, केरले च अतिवृष्ट्यै रक्तवर्णीया सञ्चेतना प्रसारितास्ति। अण्डमान-निकोबारद्वीपसमूहेषु, केरल-माहे, कोङ्कण-गोवा-मध्यमहाराष्ट्र-दक्षिणकर्नाटक-तमिलनाडु-पुडुचेरी-करैकलेषु च एकान्तस्थानेषु आगामिदिनद्वयोः अत्यधिकवृष्टेः अतीव सम्भावना विद्यते इति विभागेन सूचितम्।आकाशवाण्या सह वार्तालापं कुर्वन् ऋतु विभागस्य वरिष्ठः वैज्ञानिकः आर के जेनामणि अवदत् यत् तमिलनाडु आन्ध्रप्रदेशे च अति वृष्टेः स्थितिः यथावदेव भविष्यति।

## आईसीसी महिला क्रिकेट

आईसीसी महिलानां एकदिवसीय क्रिकेट-विश्वचषक-स्पर्धायां अद्य मध्याह्ने नवीमुंबईयाः डी.वाई.-पाटिल-क्रीडाङ्गणे भारतीयदलं न्यूज़ीलैंडदलं सम्मुखी करिष्यति। क्रीडायाः आरम्भः मध्याह्ने त्रिवादने भविष्यति।